"यो द्वादशभ्यो दिवसेभ्यः ऊर्द्ध्वं दोषत्रयेभ्यो द्विगुणेभ्य ऊर्द्ध्वम् । नृणां तनौ तिष्ठति मन्दवेगो भिषग्भिरुक्तो ज्वर एष जीर्णः" । जीर्णज्वरस्यैव विशेषं वातबलासकमाह । नित्यं मन्दज्वरो रूक्षः शूनः कृच्छ्रेण सिध्यति । स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी । वातबलासकी नर ईदृग्भवेत् । शूनः शोथी । श्लेष्मभूयिष्ठो बहुश्लेष्मकः । जीर्णज्वरी नरः कुर्य्यान्नोपवासं कदाचन । लङ्घनात् स भवेत् क्षीणो ज्वरस्तु स्याद्बली यतः । पुराणेऽपि ज्वरे दोषा यद्यपथ्यैः पुनस्तथा । लङ्घयेत् तत्र तत्पश्चात् पूर्व्वमेवाचरेत् क्रियाम्" तथा पूर्व्ववत् ।

**जीर्णदारु** पुं० नित्यक० । वृद्धदारकवृक्षे (बिधारा) राजनि० ।

**जीर्णपत्र** पुं० जीर्णं पत्रमस्य । पट्टिकालोध्रे शब्दार्थ० । २जीर्णपत्रयुक्ते त्रि० । बहु० कप् कापि अत इत्त्वम् । जीर्णपत्रिका २वंशपत्रीतृणे स्त्री राजनि० ।

**जीर्णपर्ण** पुं० जीर्णानि पर्णान्यस्य । १कदम्बे । २पुरातनपत्रयुक्ते त्रि० । कर्म्म० । ३पुरातनपत्रे न० । ४पुरातनताम्बूले च । "पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः । जीर्णपर्णं हरेदायुः सिरा बुद्धिप्रणाशिनी" वैद्यकम् ।

**जीर्णफञ्जी** स्त्री नित्यक० । वृद्धदारके वृक्षे (बिधारा) राजनि० ।

**जीर्णबुध्न** पुं० जीर्णं बुध्नं मूलमस्य । पट्टिकालोध्रे राजनि० तद्वत् कायति कै–क । जीर्णबुध्नक । (केओटा मुथा) ख्याते मुस्तकभेदे । [राजनि० ।

**जीर्णवज्र** न० जीर्णं पुरातनं वज्रं हीरकमिव । वैक्रान्तमणौ

**जीर्णवस्त्र** न० कर्म० । पुरातनवस्त्रे पटच्चरे अमरः ।

**जीर्णा** स्त्री जॄ–क्त । स्थूलजीरके राजनि० ।

**जीर्णास्थिमृत्तिका** स्त्री । कृत्रिममृत्तिकाभेदे ।

"अथ वक्ष्ये तु जीर्णास्थिमृत्तिकाकरणं प्रिये ! । शिलाजतुस्थले कुर्य्याद् दीर्घं गर्त्तं मनोहरम् । निःक्षिपेत् तत्र नानास्थिसञ्चयं द्विचतुष्पदाम् । सर्जिक्षारं महाक्षारं स्वल्पक्षारं लवणानि च । मन्दकोष्णजलं देयं नानामूत्राणि तत्र च । एवं कृत्वा मासषट्कं दद्यात् पाषाणमृत्तिकाम् । कङ्कास्यपूर्णं तदूर्द्ध्वन्तु कुर्य्याद्वह्नीष्टकां शुभाम् । त्रिवर्षाज्जायते सर्व्वमेकीभूतं दृषत्समम् । ततो निष्कास्य तच्चूर्णं कृत्वा पात्राणि निर्म्मिमेत् । प्रशस्तं भोजनं तत्र स्रुचयेदग्रदूषणम् । महाविषस्य संयोगात् तस्य भङ्गः प्रजायते । दूषीविषादिसंयोगात् पात्रे स्फोटा भवन्ति हि । तत्र क्षिप्रं क्षुद्रविषं पात्रं कृष्णं प्रजायते । एवं ज्ञात्वा तत्र दद्याद्

कदाचिद्विषादिकमिति रावणः" शब्दार्थचिन्तामणिः ।

**जीर्णि** स्त्री जॄ–क्तिन् । जीर्णतायाम् । अमरः ।

**जीर्णोद्धार** पुं० जीर्णस्य पूर्व्वप्रतिष्ठापितलिङ्गादेरुद्धारः । १पूर्व्वप्रतिष्ठापितलिङ्गादेः भग्नतादौ स्वस्थानादुद्धारे तद्विधानम् अग्निपु० ६७ अ० उक्तं यथा ।

"भगवान् उवाच । जीर्णोद्धारविधिं वक्ष्ये भूषितां स्नपयेद् गुरुः । अचलां विन्यसेद् गेहे अतिजीर्णां परित्यजेत् । व्यङ्गां भग्नां च शैलाढ्यां न्यसेदन्यां च पूर्व्ववत् । संहारविधिना तत्र तत्त्वान् संहृत्य देशिकः । सहस्रं नरसिंहेन हुत्वा तामुद्धरेद् गुरुः । दारवीं दाहयेद्वह्नौ शैलजां प्रक्षिपेज्जले । धातुजां रत्नजां वापि अगाधे वा जलेऽम्बुधौ । यानमारोप्य जीर्णाङ्गं छाद्य वस्त्रादिना नयेत् । वादित्रैः प्रक्षिपेत्तोये गुरवे दक्षिणां ददेत् । यत्प्रमाणा च यद्द्रव्या तन्मानां स्थापयेत् पुनः । कूपवापीतडागादेर्जीर्णोद्धारे महाफलम्" नि०सि०विशेषो यथा

"अथ जीर्णोद्धारः स च लिङ्गादौ दग्धे भग्ने चलिते वा कार्य्यः । अयं चानादिसिद्धप्रतिष्ठितलिङ्गादौ भङ्गादिदुष्टेऽपि न कार्य्यः । तत्र तु महाभिषेकं कुर्य्यादिति त्रिविक्रमः । कर्त्ताऽमुकदेवस्य जीर्णोद्धारं करिष्ये इत्युक्त्वा पुण्याहं वाचयित्वा आचार्य्यमृत्विजश्च वृत्वा लिङ्गे ओं व्यापकेश्वरहृदयाय नमः ओं व्यापकेश्वरशिरसे स्वाहेत्येवं षडङ्गं कृत्वाऽघोरमन्त्रं शतं जप्त्वाऽग्निं प्रतिष्ठाप्याघोरेण घृतसर्षपैः सहस्रं हुत्वा इन्द्रादिभ्यो नाम्ना बलिं दत्त्वा जीर्णदेवं प्रणवेन संपूज्य ब्रह्मादिमण्डलदेवतानां होमं पूर्व्वोक्तं कृत्वा देवं प्रार्थयेत । "जीर्णभग्नमिदं चैव सर्व्वदोषावहं नृणाम् । अस्योद्धारे कृते शान्तिः शास्त्रेऽस्मिन् कथिता त्वया । जीर्णोद्धारविधानञ्च नृपराष्ट्रहितावहम् । तदधस्तिष्ठतां देव ! प्रहरामि तवाज्ञयेति"। ततः क्षीराज्यमधुदूर्व्वाभिः समिद्भिस्त्वाष्टोत्तरसहस्रं शतं वा देवमन्त्रेण हुत्वाऽङ्गानां दशांशेन लिङ्गचालनार्थं सहस्रं शतं वा पायसेन हुत्वा लिङ्गं प्रार्थयेत । "लिङ्गरूपं समागत्य येनेदं समधिष्ठितम् । यायास्त्वं संमितं स्थानं सन्त्यज्यैव शिवाज्ञया । अत्र स्थाने च या विद्या सर्व्वविद्यैश्वरैर्युता । शिवेन सह संतिष्ठेति" मन्त्रितजलेनाभिषिच्य विसर्जयेत् । ततोऽस्त्रमन्त्रितेन खनित्रेण खात्वा लिङ्गमानीय नद्यादौ वामदेवेन लिङ्गं प्रणवेन मूर्त्तिं क्षिपेत् । दारुजन्तु मधुनाऽभ्यज्याघोरेण दहेत् । हेमरत्नादिमयन्तु दग्धं चलितं